| | | | |
|---|---|---|---|
| [A]चूषितम्-तः, | चूषितः, | चुचूषिषितः, | चोचूषितः-तवान् ; |
| चूषः, | चूषः | चुचूषिषुः, | चोचूषः ; |
| चूषितव्यम्, | चूषयितव्यम्, | चुचूषिषितव्यम्, | चोचूषितव्यम् ; |
| चूषणीयम्, | चूषणीयम्, | चुचूषिषणीयम्, | चोचूषणीयम् ; |
| चूष्यम्-[1]चोष्यम्, | चूष्यम्, | चुचूषिष्यम्, | चोचूष्यम् ; |
| ईषच्चूषः-दुश्चूषः-सुचूषः ; | | — | — |
| चूष्यमाणः | चूष्यमाणः, | चुचूषिष्यमाणः, | चोचूष्यमाणः ; |
| चूषः, | चूषः, | चुचूषिषः | चोचूषः ; |
| चूषितुम्, | चूषयितुम्, | चुचूषिषितुम्, | चोचूषितुम् ; |
| चूषा, | चूषणा, | चुचूषिषा, | चोचूषा ; |
| चूषणम्, | चूषणम्, | चुचूषिषणम्, | चोचूषणम् ; |
| चूषित्वा, | चूषयित्वा, | चुचूषिषित्वा, | चोचूषित्वा ; |
| प्रचूष्य | प्रचूष्य, | प्रचुचूषिष्य, | प्रचोचूष्य ; |
| चूषम् २, चूषित्वा २, | चूषम् २, चूषयित्वा २, | चुचूषिषम् २, चुचूषिषित्वा २, | चोचूषम् २ ; चोचूषित्वा २. |

(553) **"चृती हिंसाग्रन्थनयोः"** (VI-तुदादिः-1324. सक. सेट्. पर.)

'—श्रन्थनयोः' इति सिद्धान्तकौमुदीपाठः । श्रन्थनम्=विस्रंसनम् ।

[2]चर्तकः-र्तिका, चर्तकः-र्तिका, [3]चिचर्तिषकः-षिका, चिचृत्सकः-त्सिका, [4]चरीचृतकः-तिका ;

---

1. पृषोदरादित्वेन (6-3-109) गुणे चोष्यमित्यपि साधुः ।
2. 'पुगन्तलघूपधस्य च' (7-3-86) इति गुणः । एवं कृद्धिच्चे सर्वत्र लघूपधगुणो बोध्यः । एवं ण्यन्ते सर्वत्र गुणो ज्ञेयः ।
3. 'सेऽसिचि कृतचृतछृदतृदनृतः' (7-2-57) इति सन इड्विकल्पः । इट्पक्षे, लघूपधगुणे चिचर्तिषकः इति रूपम् । इडभावपक्षे 'हलन्ताच्च' (1-2-10) इति सनः कित्वात् न गुणः । एवं सन्नन्ते सर्वत्र रूपद्वयं ज्ञेयम् ।
4. 'रीगृदुपधस्य च' (7-4-90) इति यङन्तेऽभ्यासस्य रीगागमः । एवं यङन्ते सर्वत्र रीगागमो बोध्यः । यकाराकारयोः 'यस्य हलः' (6-4-49) इति लोपेनापहारः ।

A. 'सूर्क्ष्य त्वदीक्षा चिरकाङ्क्षिता नो वाङ्क्षाम्यमाङ्क्षयान्न तु नीचलोकान् ।
द्राक्षां जनो वाञ्छति, नो फलानि ध्राङ्क्षद्बहुध्वाङ्क्षविचूषितानि ॥'
धा. का. 1-85.